Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MP-01**

# स्नातकपरीक्षा:—२०१४

## बि.ए. — विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - कुवलयानन्दः

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एषां प्रश्नानामुत्तराणि लिखत** **2 x 5=10**

१. व्याजस्तुति-व्याजनिन्दयोः को भेदः ?

२. प्रथम-सम-विषमालङ्कारयोः प्रधानः व्यत्यासः कः ?

३. अधिकाऽल्पालङ्कारयोः विलक्षणता का ?

४.कारणमाला-एकावल्योः वैलक्षण्यं किम् ?

५. काव्यार्थापत्त्यलङ्कारे प्रयुक्तस्य कैमुत्येन इत्यस्यार्थः कः ?

**II. सलक्षणोदाहरणं पञ्च अलङ्कारान् निरूपत ।** **5 x 5=25**

१. समाधिः २. विकल्पः ३. सारः

४. असङ्गतिः ५. विभावना ६. अप्रस्तुतप्रशंसा

**III. प्रश्नानेतान् उत्तरत** **4 x 10=40**

१. 'प्रकृताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिम् इच्छन्ति प्राञ्चः'
अत्र विषये कुवलयानन्दकारस्य मतं सम्यक् विशदयत ।

२. 'निषेधाऽऽभासमाक्षेपं बुधाः केचन मन्वते' ससन्दर्भं सलक्ष्यं विवृणुत ।

३. 'उद्यानमारुतोद्धूतचूतचम्पकरेणवः । उदस्रयन्ति पान्थानामस्पृशन्तो विलोचने ॥'
अत्र दण्डिमतमनूद्य ग्रन्थकाराभिमतं विलिखत ।

४. अन्योन्यालङ्कारस्य लक्षणं विलिख्य–
ययोर्ध्वाक्षः पिबत्यम्बु पथिको विरलाङ्गुलिः ।
तथा प्रपापालिकापि धारां वितनुते तनुम् ॥ इति लक्ष्ये सङ्गमयत ।

–अनुवर्तते

**IV. पद्यत्रयं व्याख्याय तत्रत्यमलङ्कारं सलक्षणं निरूपयत ।** **3 x 5=15**

१. हृदयान्नापयातोऽसि दिक्षु सर्वासु दृश्यसे ।
वत्स राम गतोऽसीति सन्तापादनुमीयसे ॥

२. लब्धो न विसृजत्यर्थं नरो दारिद्र्यशङ्कया ।
दातापि विसृजत्यर्थं तयैव ननु शङ्कया ॥

३. अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥

४. कस्त्वं वानर रामराजभवने लेखार्थसंवाहकः
यातः कुत्र पुरागतः स हनुमान्निर्दग्धलङ्कापुरः ।
बद्धो राक्षससूनुनेति कपिभिः सन्ताडितस्तर्जितः
स व्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते ॥

**V. द्वयोः सलक्षणमलङ्कारसमन्वयं कुरुत** **2 x 5=10**

१. किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकेद्धया ।

२. हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ।

३. जैत्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधःकृतौ ।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 2

**Code No. : MP-02**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - साहित्यदर्पणः - अभिषेकनाटकं च

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**साहित्यदर्पणः-III**

**I. एकेन वाक्येनोत्तरं लिखत** **10 x1=10**

१. काव्यं पुनः कतिधा विभक्तम् ?

२. चतुर्विधान् अभिनयान् लिखत ।

३. कति रूपकाणि ? लिखत नामधेयानि ।

४. अङ्को नाम किम् ?

५. पूर्वरङ्गः कः ?

६. आधिकारिकं नाम किम् ?

७. अङ्कावतारस्यार्थः कः ?

८. कति नाटकसन्धयः सन्ति ?

९. प्रयत्नो नाम किम् ?

१०. उपक्षेपो नाम किम् ?

**II. चतुर्णां स्वरूपं विशदयत** **5 x 4=20**

१. प्रवेशकः २. अङ्कावतारः ३. अवस्था

४. मुखसन्धिः ५.सन्ध्यङ्गनिवेशनप्रयोजनम्

**III. द्वयोः टिप्पणीं रचयत** **5 x 2=10**

१.सात्वतीवृत्तिः २. नाट्यालङ्काराः ३. भाणः

**IV. द्वयोः विशदं व्याख्यानं कुरुत** **10 x2=20**

१. नाटिकायाः लक्षणं किम् ?

२. रासकस्य स्वरूपं किम् ?

–अनुवर्तते

३. प्रकरणस्य लक्षणं किम् ?

४. गद्यकाव्यं सविभागं लिखत ।

## अभिषेकनाटकम्

**V. चतुर्णां श्लोकानां भावार्थं लिखत** **5x4=20**

१. तारे विमुञ्च मम वस्त्रमनिन्दिताङ्गि प्रस्रस्तवक्रनयने किमसि प्रवृत्ता ।
सुग्रीवमद्य समरे विनिपात्यमानं तं पश्य शोणितपरिप्लुतसर्वगात्रम् ॥

२. अतिबलसुखशायी पूर्वमासीर्हरीन्द्रः क्षितितरपरिकर्ता क्षीणसर्वाङ्गचेष्टः ।
शरवरपरिवीतं व्यक्तमुत्सृज्यदेहं किमभिलषसि वीर स्वर्गमद्याभिगन्तुम् ॥

३. परभृतगुणजुष्टं बद्मषण्डाभिरामं सुरुचितपरुषण्डं तोयदाभं त्रिकूटम् ।
करचरणविमर्दैः काननं चूर्णयित्वा विगतविषयदर्पं राक्षसेशं करोमि ॥

४ युधि जगत्त्रयभीतिकृतोऽपि मे यदि कृतं त्रिदशैरिदमप्रियम् ।
अनुभवन्त्वचिरादमृताशिनः फलमतो निजशाठ्यसमुद्भवम् ॥

५. सजलजलधरेन्द्रनीतनीरो विलुलितफेनतरङ्ग चारुहारः ।
समधिगतनदीसहस्रबाहुर्हरिरिव भाति सरित्पतिः शयानः ॥

**VI. सप्रसङ्गं द्वौ व्याख्यात** **4x2=08**

१. अवश्यं युधि वीराणां वधो वा विजयोऽथवा ।

२. धर्मस्नेहान्तरे न्यस्ता बुद्धिर्दोलायते मे ।

३. वागुराच्छन्नमाश्रित्य मृगाणामिष्यते वधः ।

४. अवश्यं स्त्रीवधो न कर्तव्यः ।

**VII. पात्रचित्रणं कुरुत त्रयाणामेव** **4x3=12**

१. हनूमान्  २. सीता  ३. वाली  ४. लक्ष्मणः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MP-03**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ५

### विषयः - साहित्यदर्पणः—४, काव्यमीमांसा-२

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

I. क) ग्रन्थकाराभिमतगुणस्वरूपमुक्त्वा कति गुणाः स्वीकृताः ?तेषु माधुर्यगुणं सम्यग् व्याख्यात । **2 x 10=20**

ख) ओजोगुणस्य स्वरूपं सम्यक् प्रतिपादयत ।

अथवा

'न गुणत्वं समाधेश्च तेन नार्थगुणाः पृथक्' सप्रसङ्गं व्याख्यात ।

II. **टिप्पणीमारचयत द्वयोरेव** **2x 5=10**

१. वैदर्भी २. गौडी ३.प्रसादः ४. श्लेषः

III. **क)** पदस्य पञ्चवृत्तयः काः ? विशदीकुरुत **1 x 5=15**

अथवा

वाक्यं दशधा विभक्तम् । सोदाहरणं समन्वयत ।

ख) 'काकुर्वक्रोक्तिर्नाम शब्दालङ्कारोऽयम्' स च कतिधा विभक्तः ? साकाङ्क्षायाःप्रभेदं सोदाहरणं लिखत। **1 x 5=15**

अथवा

'अर्थस्त्रिधा' दिव्यो दिव्यमानुषो मानुषश्च । एतेषु दिव्यमानुषविभागं सोदाहरणं व्याख्यात ।

IV. **सप्रसङ्गं पञ्च व्याख्यात ।** **5 x 5=25**

१. 'मातरोऽष्टौ कवित्वस्य'

२. तयोः शब्दहरणमेव तावत् पञ्चधा ।

३. पाद एवान्यतात्वकरणकारणं न हरणम् अपि तु स्वीकरणम्' इति आचार्याः ।

४. मन्यतां स महकविः ।

५. 'भ्रमकश्चुम्बकाः किञ्च कर्षको द्रावकश्च यः । सकविर्लौकिकः'

६. कविः स चिन्तामणिरद्वितीयः ।

–अनुवर्तते

**V. सप्रसङ्गं त्रीणि व्याख्यात ।** **3 x 5=15**

१. नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरयोर्मध्यगो यस्य मेरुः खणखणायते ॥

२. नमः शिवाय सोमाय सगणाय ससूनवे ।
सवृषव्यालशूलाय सकपालाय सेन्दवे ॥

३. हिरण्यकशिपुर्दैत्यो यांयां स्मृत्वाप्युदैक्षत ।
भयभ्रान्तैः सुरैश्चक्रे तस्यै तस्यै दिशो नमः ॥

४. इक्षुदण्डस्य मण्डस्य दध्नः पिष्टकृतस्य च ।
वाराहस्य च मांसस्य शेषो गच्छति फाल्गुने ॥

—०—

Total No. of Questions : 9 ]　　　　　　　　　　　　[ Total No. of Printed Pages : 2

**Code No. : MP-4**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## सामान्यविभागः

### भागः - ३, पत्रिका - ६

### विषयः - सिद्धान्तकौमुदी

**दिनाङ्कः** - 27-03-2014 ]　　　　　　　　　　　　[ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ]　　　　　　　　　　　　[ Max. Marks : 100

---

**I. चत्वारि सूत्राणि सोदाहरणं व्याख्यात**　　　　　　　　　　　　**4 x 5=20**

१. अस्ति नास्ति दिष्टं मतिः।

२. प्रमाणे द्वयसज्दघ्नञ्मात्रचः।

३. प्राग्दिशो विभक्तिः।

४. राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्याव्यथ्याः।

५. ण्वुल्तृचौ।

६. इगुपधज्ञाप्रीकिरः कः।

**II. एषु तद्धितान्तत्रयाणां कृदन्तत्रयाणां रूपसिद्धिप्रकारं साधयत।**　　　　　　　　　　　　**6x 3=18**

| | |
|---|---|
| १. दाधिकम् | ६. एधितव्यम् |
| २. शाब्दिकः | ७. जेयम् |
| ३. भास्वान् | ८. इत्यः |
| ४. दण्डी | ९ कर्ता |
| ५. सुखी | १०. कुम्भकारः |

**III. एषु चत्वारि सानुशासनं विलिखत**　　　　　　　　　　　　**4 x 5=20**

| | |
|---|---|
| १. व्यतिलुनीते | २. प्रवहति |
| ३. विद्यामादत्ते | ४. उपरमति |
| ५. संविद्रते | ६. प्रावयति |

–अनुवर्तते

**IV. सावतरणं कारिकामिमां व्याख्यात** **10**

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।।

**V. युग्मानामेतेषाम् अर्थभेदं सप्रमाणं विलिखत** **3 x 3=9**

१. उपलम्भ्यः – उपलभ्यः

२. आचर्य : – आचार्यः

३. अर्यः – आर्यः

**VI. अधोनिर्दिष्टानां पदानां विग्रहवाक्यं प्रदर्शयत (षण्णामेव)** **6 x 1=6**

१. आक्षिकः २. हास्तिकः

३. लवणः ४. सामाजिकः

५. स्नानीयम् ६. पुष्यः

७. कृत्यम् ८. कुम्भकारः

**VII. परिनिष्ठितरूपाणि विलिखत (षण्णामेव)** **6 x 1=6**

१.स्वागतमित्याह २. उडुपेन तरति

३. दध्ना भक्षयति ४.जडस्य कर्म भावो वा

५. दीयतेऽस्मै ६. शासितुं योग्यः

७. भयं करोति ८. प्रकर्षेण जनातीति

**VIII. अधोनिर्दिष्टपदसम्बन्धिनं साधुप्रत्ययं विचित्य विलिखत ।** **5 x 1=5**

१. गौपुच्छिकः (ठक्, ठञ्, ष्ठन्)

२. विक्रयिकः (ठञ्, ठन्, ठक्)

३. वाग्मी (विन्, स्मिन्, ग्मिनिः)

४. क्षिपः (क, अच्, ण)

५. कार्यम् (यत्, ण्यत्, क्यप्)

**IX. यथारुचि वार्तिकद्वयं व्याख्यात** **6x 1=6**

१. भावप्रत्ययान्तादिमब्वक्तव्यः

२. ण्यत्प्रकरणे लपिदमिभ्यां चेति वक्तव्यम् ।

३.तनोतेरुपसङ्ख्यानम्

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MP-5**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - परिभाषेन्दुशेखरः-२

**दिनाङ्कः** -23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्चैव प्रश्नाः समाधेयाः** **12x 5 =60**

१. 'अल्लोपोऽनः' सूत्रस्य तपरकरणं कस्याः परिभाषायाः अनित्यत्वज्ञापकमिति ससन्दर्भं व्याख्यात।

२. 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' इति कथं निरूपितं ग्रन्थकारेण ? विशदयत।

३. 'इयं च परान्तरङ्गादिबाधकानामपि अबाधकत्वबोधिका' ससन्दर्भं वाक्यस्याशयं स्पष्टयत।

४. 'दीर्घोऽकितः इत्यकिद्ग्रहणमस्या ज्ञापकम्' वाक्यस्यास्यकिं तात्पर्यम् ? सग्रन्थं निरूपयत।

५. सावतरणम् 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इतीमां परिभाषां व्याख्यात।

**II. इमे अवतरणिके साशयसमाधानं विवृणुत** **10x2 =20**

१. ननु तच्छीलादितृन्विषये ण्वुलपि स्यात्।

२. ननु 'अयजे इन्द्रम्' इत्यादौ अन्तरङ्गस्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यात्।

**III. एषां टिप्पणीं रचयत।** **5x4 =20**

१. तक्रकौण्डिन्यन्यायः

२. बाध्यसामान्यचिन्ता

३.अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते

४. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MP-6**

# स्नातकपरीक्षाः—२०१४

## बि.ए. — विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - प्रौढमनोरमा-२

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **12 x 5 = 60**

१. 'कृत्तद्धितसमासाश्च' इति सूत्रे समासग्रहणस्य नियमार्थत्वं सोपपत्तिकं प्रतिपादयत ।

२. सदलकृत्यं 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रं व्याख्यात ।

३. अर्थवत्सूत्रे अप्रत्ययपदावृत्तेः प्रयोजनं यथाग्रन्थम् उपवर्णयत ।

४. 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रे नुम्ग्रहणस्य प्रयोजनं किमिति विशदयत ।

५. सर्वादिगणे उभशब्दपाठस्य आवश्यकतां समर्थयत ।

६. अमुना इत्यत्र सप्रमाणं नाभावं साधयत ।

**II. सावतरणं द्वयं व्याख्यात ।** **10 x 2 = 20**

१. उपायाः शिक्षमाणानां बालानामुपलालनाः ।

२. परिभाषायाः प्रयोजनं तु अयस्कुम्भी ।

३. 'सर्वनाम्नोऽसुङ् च' इत्येव सूच्यताम् ।

**III. सावतरणं द्वयोः टिप्पणीं लिखत ।** **10 x 2 = 20**

१. सम्बन्धिशब्दः सापेक्षः नित्यं सर्वः समस्यते ।

२. अतिदेशसूत्रम् ।

३. एकापि षष्ठी विषयभेदात् भिद्यते ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MP-7**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्–व्याकरणशास्त्रम्

### भागः - २, पत्रिका - ५

### विषयः - महाभाष्यम्-२

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. यथारुचि पञ्च प्रश्नाः समाधेयाः** **12 x 5 = 60**

१. अकारस्य विवृतोपेशः कर्तव्यो वा न वा ? विचारयत।

२. 'विषयेण तु नानालिङ्गकरणात् सिद्धम्' इत्यस्याशयं ससन्दर्भं स्पष्टयत।

३. लृकरोदेशः किमर्थः ? भाष्योक्तदिशा विवृणुत।

४. सन्ध्यक्षरेषु तपरोपदेशः कर्तव्यो न वा ? भष्याभिप्रायं सम्यग् विविच्य लिखत।

५. प्रत्याहारसूत्रेषु द्विरुपदिष्टस्य हकारस्य प्रयोजनं सोदाहरणं विलिखत।

६. 'अयोगवाहानामविशेषेणोपदेशः कर्तव्यः' इत्यस्याशयं निरूप्य तस्य प्रयोजनानि सोदाहरणं विशदयत।

**II. ससन्दर्भं द्वयं व्याख्यात।** **10 x 2 = 20**

१. शकुनिवत् स्युः

२. दीर्घे ह्रस्वविधिप्रतिषेधः

३. अश्नोतेर्वा सरोऽक्षरम्

**III. चतुर्णां टिप्पणीं रचयत।** **5 x 4 = 20**

१. अनुबन्धानाम् अप्रधानत्वविचारः

२. अयोगवाहपदार्थः

३. वर्णोपदेशप्रयोजनम्

४. वर्णव्यत्यये चार्थन्तरगमनात्

५. अशिष्टाप्रतिषिद्धम् अनुकरणम्

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : MP-08**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - २, पत्रिका - ३

### विषयः - चतुर्दशलक्षणी-२

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. त्रयं समाधेयम्** **3 x 20 = 60**

१.'अत एव भूतत्वमूर्तत्वोभयवान्' इमं दीधितिग्रन्थं 'परे तु मतेन' व्याख्याय निराकुरुत।

२. व्यापकतालक्षणे अभावे प्रतियोगिवैयधिकरण्यं निवेशयतां मतमनुवदत।

३. 'यत्समानाधिकरणा....' अत्र लक्षणे प्रतियोगिसामानाधिकरण्यं केन सम्बन्धेन ? विमृशत।

४. 'जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्य अभावः जलत्वाद्यभाव एव, न तु धूमाद्यभावः...' इत्यादिदीधितिग्रन्थं सम्यक् व्याख्यात।

**II. द्वयं समाधेयम्** **2x 10 = 20**

१. यत्समानाधिकरण्यदलविषये यत्तुकारमतमाशङ्क्य समाधत्त।

२. 'येन सम्बन्धेन हेतुः तेनैव सम्बन्धेन तदधिकरणत्वं बोध्यम्' इमां दीधितिं व्याख्यात।

३.'एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः' इत्यादिदीधितिं व्याख्यात।

**III. अङ्कानुगुणं लिखत।**

१. 'पारिभाषिकमव्यभिचरितत्वम्' एतद्वाक्यजन्यबोधः यथाग्रन्थमनुवर्णनीयः। **03**

२. 'यत्समानाधिकरणाः...' लक्षणं विलिख्य समन्वयं साधयत **04**

३. लक्षणे यत्तत्पदयोरर्थः कः ? **01**

४. चरमोक्तस्यापि यावत्पदस्य व्यावृत्तेः प्रथमतः प्रदर्शने हेतुः कः ? **03**

५. 'सर्वत्र वाच्यत्वाद्यभावस्य तथात्वात्' अत्र दीधितौ सर्वत्र इत्यस्यार्थः कः ? तत्प्रयोजनं किम् ? तथात्वात् इत्यस्य अर्थः कः ? **04**

६. गदाधरोक्तं लघुलक्षणद्वयं लिखत। **05**

—०—

Total No. of Questions : 12 ] [ Total No. of Printed Pages : 1

**Code No. : MP-09**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - २, पत्रिका - ४

### विषयः - सामान्यनिरुक्तिः

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना- दशैव प्रश्नाः समाधेयाः। सर्वे समानाङ्काः।**

I. यद्विषयकत्वेनेत्यादिलक्षणनिर्वचने बीजमुल्लिख्य तल्लक्षणं लक्ष्ये योजयत। 10

II. लक्षणस्थतृतीयाया अवच्छेदकत्वार्थाभ्युपगमे दोषं प्रदर्श्य भट्टाचार्यकृतपरिष्कारं लिखत। 10

III. 'अनतिरिक्तवृतित्वं न स्वव्यापकतत्कत्वरूपम्' इति वदतां यत्तुकाराणां मतमनूद्य खण्डयत। 10

IV. 'तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ नातिव्याप्तिः' कुत्रातिव्याप्तिः ? तत्परिहारश्च कथमिति विशदयत। 10

V. लक्षणस्थज्ञानपदस्य निष्कृष्टार्थः कः ? तादृशार्थानभ्यपगमे को दोषः ? 10

VI. विशिष्टद्वयाघटितत्वविशेषणदाने सत्प्रतिपक्षे कथमव्याप्तिः? 10

VII. 'तेन विशिष्टस्याप्रसिद्धत्वेऽपि भ्रमात्प्रतिबन्धेऽपि न क्षतिः' इति हि दीधितिः। किं तद्विशिष्टम् ? कुत्र प्रतिबन्धः ? यथाग्रन्थं निर्वेचयत। 10

VIII. पक्षसाध्यभेदेन लक्षणभेदः भवति वा ? भट्टाचार्याणामाशयं निरूपयत। 10

IX. मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिमाशङ्क्य निराकुरुत। 10

X. प्रथमनचकल्पानुसारेण हेतुं निर्दिश्य अव्याप्तिदोषं परिहरत 10

XI. न च स्वावच्छिन्नेत्यादि द्वितीय नच कल्पस्य व्यभिचारघटितबाधेऽव्याप्तिमुद्धाटयत। 10

XII. लघुटिप्पणीः आरचयत (द्वयोरेव) 5x2 = 10

१. अनतिरिक्तवृत्तित्वम्

२. प्रतिबध्यप्रतिबन्धकभावः

३. अनाहार्यज्ञानम्

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 2

**Code No. : MP-10**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायः

### भागः - २, पत्रिका - ५

### विषयः - अवयवः

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येनोत्तरत दशानामेव ।** **2 x 10 = 20**

१. पञ्चावयवानां नामानि लिखत ।

२. पञ्चावयवेषु प्रत्येकावयवस्य प्रयोजनं किमिति विलिखत ।

३. तत्र मणिकारोक्तं समस्तरूपोपपन्नमित्यादिलक्षणवाक्यं विलिखत ।

४. अनुमानं कतिविधम् ?

५. को नाम न्यायः ?

६.किन्नाम एकवाक्यत्वम् ?

७. किन्नाम अन्यतमत्वम् ?

८. सङ्गतिर्नाम का ?

९. सङ्गतिः कतिविधा ?

१०. स्वार्थानुमितिपरार्थानुमित्योः किं कारणम् ?

११. किन्नाम उचितानुपूर्वीकत्वम् ?

१२. अनुमितेः चरमं कारणं किम् ? इतरकारणानि कानि ?

**II. यथारुचि पञ्चप्रश्नाः समाधेयाः ।** **12x 5 = 60**

१. मणिकारोक्तन्यायसिद्धान्तलक्षणं सदलकृत्यं लक्ष्ये योजयत ।

२. दीधितिकारोक्तन्यायलक्षणं सदलकृत्यं लक्ष्ये योजयत ।

३. मणिकारोक्तम् अवयवलक्षणं सदलकृत्यं लक्ष्ये योजयत ।

४. उचितानुपूर्वीकत्वं ग्रन्थोक्तदिशा परिष्कुरुत ।

५. मणिकारोक्तन्यायसिद्धान्तलक्षणे दीधितिकारोक्तदिशा दोषः प्रदर्शयत

६. 'तच्चानुमानं परार्थं न्यायसाध्यं.....' इत्यादिमणिकारवाक्यं निपुणं व्याख्यात ।

–अनुवर्तते

**III. यथारुचि पञ्चानां टिप्पणीः रचयत।** **5x 4 =20**

१. मणिकारः

२. न्यायः

३. रघुनाथशिरोमणिः

४. अवयवप्रकरणम्

५. आकाङ्क्षा

६. शाब्दज्ञानम्

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MP-14**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - २, पत्रिका - ३

## विषयः - आपस्तम्बधर्मसूत्रम्

**दिनाङ्कः** - 23-03-2014 ] **[ गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. ससन्दर्भं विवृणुत** **10**

अ) नाननियोगपूर्वमिति हरीतः ।

आ). आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः ।

इ) क्रोधादींश्च भूतदाहीयान्दोषान् वर्जयेत् ।

ई) पूः प्राणिनः सर्व एव गुहाशयस्याहन्यमानस्य विकल्मषस्याचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ।

**II.** अनापदि कस्यान्नं भोज्यं कस्य न- विमृशत **10**

**III.** धर्मलक्षणमुक्त्वा लौकिकमर्थं पुरस्कृत्य धर्मान्नाचरेदिति सहेतुकं विवृणुत । **10**

**IV.** 'तच्छास्त्रैर्विप्रतिषिद्धम् इत्युक्तम्, तच्छास्त्रं किम् ? तस्य निषेधे कारणं किम्? विवृणुत । **10**

**V.** किं वाजसनेयिब्राह्मणस्य 'ब्रह्मजज्ञो ह वा एष....'इत्यस्य यथाश्रुतार्थत्वं किमुत शाखान्तरे व्यवस्था-सकारणं विवृणुत । **10**

**VI.** हर्षस्य निन्दां ओंकारप्रशंसां च कृत्वा 'अथ ब्राह्मणोक्ता विधयः' इत्युक्तान् विधीन् सङ्गृह्णीत । **10**

**VII.** कोऽभिशस्तः । तस्य निर्वेदः कः । विवृणुत । **10**

**VIII.** 'अथ स्नातकव्रतानि' इत्यारभ्योक्तान् नियमान् सङ्गृह्णीत । **10**

**IX.** उपनयनकालान् तदतिक्रमे दोषं प्रायश्चित्तं च प्रकाशयत । **8**

**X.** गुरुप्रसादनीयानि कर्माणि सङ्गृह्णीत । **7**

—०—

Total No. of Questions : 13 ] [ Total No. of Printed Pages : 1

**Code No. : MP-15**

# स्नातकपरीक्षा:—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्— धर्मशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - याज्ञवल्क्यस्मृतिः-२

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः** - १००

**समयः**- 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 100

---

**I. पञ्चश्लोकान् सप्रसङ्गं व्याख्यात** **5x 6 = 30**

१. व्यवहारान् नृपः पश्येद् विद्वद्भिः ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

२. स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥

३. अशीतिभागो वृद्धिस्यान्मासि मासि सबन्धके ।
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा ॥

४. तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥

५. असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशात् दत्त्वांशं तु तुरीयकम् ॥

६. स्वं कुटुम्बाविरोधेन देयं दारसुतादृते ।
नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥

**II. चतुर्णामुत्तराणि लिखत** **4x 15 = 60**

१. 'अभियोगमनिस्तीर्य' इत्यादिना निरूपितं असाधारणव्यवहारस्वरूपं विमृश्य लिखत ।

२. ऋणादानप्रकरणं यथाग्रन्थं व्याख्यात ।

३. 'तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये' इत्यादिना विमृष्टानां दिव्यनां स्वरूपं भेदं च यथाग्रन्थमनुवदत ।

४. 'ग्राहकैर्गृह्यते चोरा' इत्यादिना निरूपितं स्तेयप्रकरणं सङ्क्षेपेण विवृणुत ।

५. वाक्पारुष्यं दण्डपारुष्यं च यथाग्रन्थं विमृश्य लिखत ।

**III. द्वयोः विवर्णं कुरुत** **2x 5 =10**

१. व्यवहारः २. साक्षी ३. दायः

—०—

Total No. of Questions : 11 ] [ Total No. of Printed Pages : 1

**Code No. : MP-16**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - २, पत्रिका -५

## विषयः - जैमिनीयन्यायमालाविस्तरः

**दिनाङ्कः** -26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचाना-अन्तिममनपहाय दशप्रश्नाः समाधेयाः।**

| | | |
|---|---|---|
| **I.** | अरुणाधिकरणमारचयत। | **10** |
| **II.** | 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र सप्तदशारत्नित्वं कुत्र निविशते ? | **10** |
| **III.** | ऐन्द्रीऋचः गार्हपत्योपस्थानाङ्गत्वं यथाग्रन्थं विवृणुत। | **10** |
| **IV.** | उच्चैस्त्वादीनां वेदधर्मत्वमाक्षिप्य समाधत्त। | **10** |
| **V.** | अश्वप्रतिग्रहेष्टिः दातुर्वा प्रतिगृहीतुर्वेति यथाग्रन्थं विमृश्य लिखत। | **10** |
| **VI.** | प्रजापतिव्रतानां पुरुषार्थत्वमाक्षिप्य समाधत्त। | **10** |
| **VII.** | 'पशुमालभेत' इत्यत्र पशुलिङ्गं विवक्षितं न वेति यथाग्रन्थं विवृणुत। | **10** |
| **VIII.** | शाखाप्रहरणस्य प्रतिपत्तिकर्मत्वं सिद्धान्तयत। | **10** |
| **IX.** | विश्वजिन्यायं रात्रिसत्रन्यायश्च ग्रन्थोक्तदिशा अनुवदत। | **10** |
| **X.** | जातेष्ट्या किं फलम् ? कदा केन कर्तव्यमिति यथाग्रन्थं विवृणुत। | **10** |
| **XI.** | **धर्मलक्षणप्रमाणविषये लघुप्रबन्धमेकं विरचयत।** | **20** |

—०—

Total No. of Questions : 11) ] [ Total No. of Printed Pages : 1

**Code No. : MP-17**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - बीजगणितम्

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय आहत्याष्टौ प्रश्नाः समाधेयाः।**

**I.** अ). अव्यक्तगुणनक्रमं उपवर्णयत। **6**

आ). या[२]१६-२४या+९ अस्य वर्गमूलं आनयत। **6**

**II.** अ). (या३का४) (या५+का३) अनयोः गुणनफलं आनयत। **6**

आ). धनर्णषड्विधं सोदाहरणं विलिखत। **6**

**III.** करण्योः योगान्तरानयनक्रमं सोदाहरणं निरूपयत। **12**

**IV.** करणीमूलानयनं विलिख्य रू१० क२४ क४० क६० अस्य मूलं साधयत। **12**

**V.** यद्गुणा क्षयगषष्टिरन्विता वर्जिता च यदि वा त्रिभिस्ततः।
स्यात् त्रयोदशहृता निरग्रका स्यात्। तत्र गुणकः कः ? **12**

**VI.** स्थिरकुट्टकस्य स्वरूपं सोदाहरणं निरूप्य कुत्रास्य उपयोग इति प्रदर्शयत। **12**

**VII.** युतौ वर्गान्तरे वर्गौ ययोर्घाते भवेत्। अत्र तौ राशी कौ ? समानयत। **12**

**VIII.** त्रिभुजे भूमिः=१४ एकः भुजः-१५ अपरः=१३ अत्र लम्बः कः ? **12**

**IX.** पञ्चकशतेन दत्तं मूलं सकलान्तरं गते वर्षे। द्विगुणं षोडशहीनं लब्धं किं मूलमाचक्ष्व॥ **12**

**X.** शतं हतं येन युतं नवत्या विवर्जितं वा। विहृते त्रिषष्ट्या निरग्रकं स्यात्। तत्र गुणं वद। **12**

**XI.** क). योगजे तक्षणाच्छुद्धे गुणाप्ती स्तः वियोगजे।
धनभाज्योद्भवे तद्वत् भवेतामृणभाज्यसे॥ सप्रसङ्गं अस्याशयं प्रकटयत। **08**

ख). अव्यक्तवर्गवर्गमूलयोः आनयनक्रमं विलिखत **08**

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MP-18**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - २, पत्रिका -४

### विषयः - सूर्यसिद्धान्तः- २

**दिनाङ्कः** -24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

**सूचना - अन्तिममनपहाय आहत्य षट् प्रश्नाः समाधेयाः।**

I. रविचन्द्रयोः योजनात्मकबिम्बव्यासानयनं विलिख्य चन्द्रकक्षायां रविबिम्बव्यासमानानयनं निरूपयत। **15**

II. ग्रहणं कदा भवतीति विसदय्य भूभाबिम्बसाधनक्रमं स्पष्टयत। **15**

III. स्थितिमदार्धानयनं उपवर्ण्य ताभ्यां स्पर्शादिकालानयनं विशदयत। **15**

IV. इष्टकालिकग्रासानयनं ग्रासदिष्टकालानयनं च विलिखत **15**

V. सप्रयोजनं नतिसाधनं स्फुटविक्षेपानयनं च निरूपयत। **15**

VI. ग्रहणपटिलेखं छेद्यकोक्तप्रकारेण प्रदर्शयत। **15**

VII. सूर्यग्रहणे स्थितिमर्दार्धादौ वैशिष्ट्यं किम् ? विचारयत। **15**

VIII. सप्रयोजनं दृक्कर्मानयनं निरूपयत। **15**

IX. चन्द्रशृङ्गोन्नतिः कदा सम्भवति ? तत्साधनार्थं भुजकोटिकर्णानयनक्रमं उपवर्णयत। **15**

X. **पञ्चानां टिप्पणीरारचयत।** **5x 5 = 25**

१. वलनम् २.लम्बनम्

३. स्फुटक्रान्तिः ४. शरः

५. नतिः ६. पातः

७. शृङ्गोन्नतिः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MP-19**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्धन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषश्शास्त्रम्

### भागः - २, पत्रिका -५

### विषयः - बृहज्जातकम्-२

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. रिक्तस्थानं पूरयत।** **5 x 1 = 5**

१.स्वतुङ्गगैः क्रूरैः........महीपतिः भवतीति यवनाः प्राहुः ।

२. तिग्मांशुर्जनयत्युषेशसहितो...................नरम् ।

३. शशी ससितः क्रियादिकुशलं सार्किः................।

४. दुःखार्तोऽसत्यसन्धः ससवितृतनये........निन्दितश्च ।

५. शठगर्वितः कृतघ्नो हिंस्रः पापश्च....................।

**II. संयोजयत** **5 x 1 = 5**

| | | |
|---|---|---|
| १. कुजः प्रव्रज्याकारकेषु बलिष्ठश्चेत् | – | चक्रधरः |
| २.बुधः प्रव्रज्याकारकेषु बलिष्ठश्चेत् | – | वृद्धश्रावकः |
| ३. गुरुः प्रव्रज्याकारकेषु बलिष्ठश्चेत् | – | शाक्यः |
| ४. चन्द्रः प्रव्रज्याकारकेषु बलिष्ठश्चेत् | – | आजीविकः |
| ५. शुक्रः प्रव्रज्याकारकेषु बलिष्ठश्चेत् | – | भिक्षुः |

**III. दशप्रश्नानामुत्तराणि लिखत** **10 x3 =30**

१. राजयोगत्रयं लिखत।

२. आश्रययोगाः के ? तेषां लक्षणं विलिखत।

३. अधियोगः कथं जायते ? सफलं विलिखत।

४. गुरुः शुक्रेण, शनिना च युते, तथा शुक्रशन्योः योगे कानि फलानि ? विलिखत।

५. अश्विनीभरणीकृत्तिकानक्षत्रेषु जातस्य शीलविज्ञानं प्रकटयन्तु ।

६.वृषभराशेः शीलं विलिखत।

७. मेषादिषु त्रिषु राशिषु चन्द्रे स्थिते सति भौमाद्यैः ग्रहैः दृश्यमाने जातस्य स्वरूपं विलिखत।

–अनुवर्तते

८. गुरोः भावस्थितिविशेषफलं विलिखत।

९. अन्योन्यकाककग्रहाः के ? सोदाहरणं विलिखत।

१०. स्त्रीजातके सप्तमेन पतिचिन्तनम् कथं करणीयम् ?

११. जातः जन्तुः कस्मात् लोकादागत इति ज्ञानं स्पष्टयत।

**IV. योगपञ्चकं विवृणुत** **5 x4 =20**

१. रज्जुयोगः २. शकटयोगः ३. यूपः ४. छत्रयोगः

५. समुद्रयोगः ६. स्रक्योगः ७. वसुमद्योगः।

**V. उत्तरत (चतुर्णामेव)** **10 x4 =40**

१. अपि खलकुलजाता मानवा राज्यभाजः
किमुत नृपकुलोत्थाः प्रोक्तभूपालयोगैः।
नृपतिकुलसमुत्थाः पार्थिवा वक्ष्यमाणैः
भवति नृपतितुल्यस्तेष्वभूपालपुत्रः ॥- सावतरणं विवृणुत।

२. सङ्ख्यायोगाः कति ? सफलानि विवृणुत।

३. बलवति राशौ तदधिपतौ च स्वबलयुतः स्याद् यदि तुहिनांशुः।
कथितफलानामविकलदाता शशिवदतोऽन्येप्यनुपरिचिन्त्याः ॥ –सावतरणं विवृणुत।

४. रवेः द्वादशभावफलानि विलिखत।

५. स्त्रीजातकचिन्तनाक्रमं ग्रन्थोक्तदिशा स्पष्टयत।

६. 'मृत्युर्मृत्युगृहेक्षणेन........' इत्याद्युक्तप्रकारेण मरणचिन्तनं स्पष्टयत।

—o—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : MP-20**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - २, पत्रिका - ३

### विषयः - भाट्टदीपिका-३

**दिनाङ्कः** - 23-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I.** ग्रन्थोक्तदिशा क्रमलक्षणं विलिख्य लक्ष्ये योजयत। **10**

**II.** 'सप्तदशप्रजापत्यान्....' इत्यत्र अनुष्ठानं कथमिति व्याख्यात। **10**

**III.** 'यत्सोमेन यक्ष्यमाणः....' इत्यत्र सोमस्य विधानं कथमिति व्याकुरुत। **10**

**IV.** आतिदेशिक पाठक्रमापेक्षया विकृतौ मुख्यक्रमस्य प्राबल्यं व्याख्यात। **10**

**V.** अधिकारलक्षणं विलिख्य लक्ष्ये योजयत। **10**

**VI.** दम्पत्योः सहाधिकारत्वं स्पष्टयत। **10**

**VII.** कर्मणि देवताविषये प्रनिनिधिः वर्तते वा नवा विवेचयत। **10**

**VIII.** रथकाराधिकरणमारचयत **10**

**IX.** 'नित्येषु यथाशक्तिन्यायः' प्रदर्शयत **10**

**X.** टिप्पणीः लिखत **10**

१.श्रुतिः

२. विधिः

३.अर्थक्रमः

४.अधिकारी

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : MP-21**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - भाट्टदीपिका

**दिनाङ्कः** - 24-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 100

---

### अङ्कानुगुणं व्याख्यात

I. 'समानमितरच्छ्येनेन' इत्यत्र वचनेनानेन श्येनयागधर्माः (इषुयाप्रवन्ति' इषौ प्राप्यन्ते। 12

II. 'विश्वजित् सर्वपृष्ठोऽतिरात्रः'इत्यत्र सर्वपृष्ठशब्देन षट् पृष्ठानां साम्नां अतिदेशः विधीयते। 12

III. इदं च वाक्यं चातुर्मास्येषु श्रूयते। अत्र प्राकृतप्रणयनोत्तरम् आहवनीयापादकं प्रणयनान्तरं अपूर्वं विधीयते। 12

IV. 'पृष्ठैरुपतिष्ठते' इत्यनेन आज्यस्तावकाः केचित् मन्त्राः विधीयन्ते। पृष्ठशब्दस्य अत्र मन्त्रवाचित्वं विज्ञेयम्। 12

V. सौर्ययागस्य आग्नेयविकारत्वं अङ्गीक्रियते। द्रव्यघटितसादृश्यवशात्। 12

VI. दैक्षपशोः सान्नाय्यविकारत्वम् अङ्गीक्रियते। पशुप्रभवद्रव्यकत्वात्। तत्रापि पयोयागविकारः अङ्गीक्रियते। उभयत्रापि साक्षात् पशुप्रभवद्रव्यकत्वात्। 12

VII. द्रव्यघटितसादृश्ययोर्मध्ये विप्रतिपत्तिस्तावत् 'तप्ते पयसि दध्यानयति वाजिभ्यो वानिनम्' इत्यत्र प्रदर्शितम्। अत्र दधियागस्य विकारत्वं पूर्वपक्षीकृत्य पयोगागविकारत्वम् आमिक्षायागस्य सिद्धिान्तितम्। आयिक्षायाः मधुरभूयस्त्वात्। 12

VIII. ज्योतिष्टोमे ऐष्टिकधर्मातिदेशं पूर्वपक्षीकृत्य सर्वाङ्गसद्भावात् अनतिदेशं सिद्धान्तितम्। 8

IX. द्रव्यदेवतादि सन्निपत्योपकारकाणां सद्भावात् नैराकाङ्क्षत्वाच्च दर्विहोमाः अपूर्वा एव। 8

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : MP-22**

# स्नातकपरीक्षाः–२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– पूर्वमीमांसाशास्त्रम्

### भागः - २, पत्रिका - ५

### विषयः - शास्त्रदीपिका-२

**दिनाङ्कः** - 26-03-2014 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना - सर्वे प्रश्नाः समानाङ्काः**

| | | |
|---|---|---|
| **I.** | शब्दार्थसम्बन्धस्य अनित्यत्वं निराकुरुत । | **10** |
| **II.** | चित्रादियागानां अपूर्वद्वारा फलसाधनत्वं प्रतिपादयत । | **10** |
| **III.** | स्फोटवादं विलिखत । | **10** |
| **IV.** | 'अथ गौः' इत्यस्य शब्दस्य कोऽर्थः? इदीतं वाक्यं व्याकुरुत । | **10** |
| **V.** | शरीरात्मवादं खण्डयत । | **10** |
| **VI.** | क्षणभङ्गवादं विलिखत । | **10** |
| **VII.** | आत्मज्ञानस्य क्रतूपयोगित्वं प्रतिपादयत । | **10** |
| **VIII.** | शब्दनित्यत्वसिद्धान्तं निरूपयत । | **10** |
| **IX.** | अभिहितान्वयवादं विलिखत । | **10** |
| **X.** | वेदानां अपौरुषेयत्वं प्रतिपादयत । | **10** |

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MP-23**

# स्नातकपरीक्षाः—२०१४

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– द्वैतवेदान्तशास्त्रम्

